# હિમાલયકૃતં શિવસ્તોત્રમ

## Himalaya Krutam Shiva stotram

---

હિમાલય કૃતં શિવ સ્તોત્રમ

હિમાલય ઉવાચ ||

ત્વં બ્રહ્મા સૃષ્ટિકર્તા ચ ત્વં વિષ્ણુઃ પરિપાલકઃ |
ત્વં શિવઃ શિવદોઽનન્તઃ સર્વસંહારકારકઃ ||૧||

ત્વમીશ્વરો ગુણાતીતો જ્યોતીરૂપઃ સનાતનઃ
પ્રકૃતઃ પ્રકૃતીશશ્ચ પ્રાકૃતઃ પ્રકૃતેઃ પરઃ ||૨||

નાનારૂપવિધાતા ત્વં ભક્તાનાં ધ્યાનહેતવે |
યેષુ રૂપેપુ યત્પ્રીતિસ્તત્તદ્રૂપં બિભર્ષિ ચ ||૩||

સૂર્યસ્ત્વં સૃષ્ટિજનક આધારઃ સર્વતેજસામ |
સોમસ્ત્વં સસ્યપાતા ચ સતતં શીતરશ્મિના ||૪||

વાયુસ્ત્વં વરુણસ્ત્વં ચ વિદ્વાંશ્ચ વિદુષાં ગુરુઃ |
મૃત્યુઞ્જયો મૃત્યુમૃત્યુઃ કાલકાલો યમાન્તકઃ ||૫||

વેદસ્ત્વં વેદકર્તા ચ વેદવેદાઙ્ગપારગઃ |
વિદુષાં જનકસ્ત્વં ચ વિદ્વાંશ્ચ વિદુષાં ગુરુઃ ||૬||

મન્ત્રસ્ત્વં હિ જપસ્ત્વં હિ તપસ્ત્વં તત્ફલપ્રદઃ |
વાક ત્વં રાગાધિદેવી ત્વં તત્કર્તા તદ્ગુરુઃ સ્વયમ ||૭||

અહો સરસ્વતીબીજ  કસ્ત્વાં સ્તોતુમિહેશ્વરઃ |
ઇત્યેવમુક્ત્વા શૈલેન્દ્રસ્તસ્થૌ ધૃત્વા પદાંબુજમ ||૮||

તત્રોવાસ તમાબોધ્ય ચાવરુહ્ય વૃષાચ્છિવઃ |
સ્તોત્રમેતન્મહાપુણ્યં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ||૯||

મુચ્યતે સર્વપાપેભ્યો ભયેભ્યશ્ચ ભવાર્ણવે |
અપુત્રો લભતે પુત્રં માસમેકં પઠેદ્યદિ ||૧૦||

ભાર્યાહીનો લભેદ્ભાર્યાં સુશીલાં સુમનોહરામ |
ચિરકાલગતં વસ્તુ લભતે સહસા ધ્રુવમ ||૧૧||

રાજ્યભ્રષ્ટો લભેદ્રાજ્યં શઙ્કરસ્ય પ્રસાદતઃ |
કારાગારે શ્મશાને ચ શત્રુગ્રસ્તેઽતિસઙ્કટે ||૧૨||

ગભીરેઽતિજલાકીર્ણે ભગ્નપોતે વિષાદને |
રણમધ્યે મહાભીતે હિંસ્રજન્તુસમન્વિતે ||૧૩||

યઃ પઠેચ્છ્રદ્ધયા સમ્યક સ્તોત્રમેતજ્જગદ્ગુરોઃ |
સર્વતો મુચ્યતે સ્તુત્વા શઙ્કરસ્ય પ્રસાદતઃ ||૧૪||

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરાણે શ્રીકૃષ્ણજન્મખણ્ડે
હિમાલયકૃતં શિવસ્તોત્રં સંપૂર્ણમ ||